हत्वा सम्पूर्णरमणं सती च त्यक्तमैथुना ।
उत्थानाय मनश्चक्रे उभयोस्तेज उत्तमम् ।
पपात धरणीपृष्ठे तेर्व्याप्तमखिलं जगत् ॥
पाताले भूतले स्वर्गे शिवलिङ्गास्तदाभवन् ।
तेन भूता भविष्याश्च शिवलिङ्गाः सयोनयः ॥
यत्र लिङ्गं तत्र योनिर्यत्र योनिस्ततः शिवः ।
उभयोश्चैव तेजोभिः शिवलिङ्गं व्यजायत ॥"
इति शिवलिङ्गोत्पत्तिकथनमिति नारदपञ्चरात्रान्तर्गतत्तृतीयरात्रे प्रथमाध्याये नारदब्रह्मसंवादः ॥ * ॥ शिवलिङ्गपूजायां सर्व्वेषामधिकारो यथा,—
"शाक्तो वा वैष्णवो वापि सौरो वा गाणपोऽथवा ।
शिवार्च्चनविहीनस्य कुतः सिद्धिर्भवेत् प्रिये ॥
अनाराध्य च मां देवि योऽर्च्चयेद्देवतान्तरम् ।
न गृह्णाति महादेवि प्राप्यं दत्त्वा व्रजेत् पुरम् ॥
पर्व्वताग्रसमं देवि मिष्टान्नादि क्रमेण हि ।
फलानि बहुधान्येव पुष्पाण्येव यथाविधि ॥
सुमेरुसदृशं चान्नं नानाविधं महेश्वरी ।
सूपादिकं महेशानि यदि स्यात् सागरोपमम् ॥
यद्दत्तं पुष्पनैवेद्यं सर्व्वं विष्ठासमं भवेत् ।
शिवार्च्चनविहीनो यः पूजयेद्देवतान्तरम् ।
विशेषतः कलियुगे स नरः पापभाग्भवेत् ॥"
इति उत्पत्तितन्त्रे ६४ पटलः ॥ * ॥
"सर्व्वपूजासु देवेशि ! लिङ्गपूजापरं पदम् ।
लिङ्गपूजां विना देवि अन्यपूजां करोति यः ॥
विफला तस्य पूजा स्यादन्ते नरकमाप्नुयात् ।
तस्माल्लिङ्गं महेशानि प्रथमं परिपूजयेत् ॥
यद्गार्ह्यं लिङ्गपूजायां रहितं सततं प्रिये ।
तद्गार्ह्यं पतितं मन्ये विष्ठाभूमिसमं स्मृतम् ॥
ब्रह्म विट् क्षत्रियो देवि यदि लिङ्गं न पूजयेत् ।
तत्क्षणात् परमेशानि त्रयश्चाण्डालतामियुः ।
शूद्रश्च परमेशानि सदा शूकरवद्भवेत् ॥
शिवार्च्चनन्तु देवेशि यस्मिन् गेहे विवर्ज्जितम् ।
विष्ठागर्त्तसमं देवि तद्गृहं विद्धि पार्व्वति ।
अन्नं विष्ठा पयो मूत्रं तस्मिन् वेश्मनि पार्व्वति ॥
शाक्तो वा वैष्णवो वापि शैवो वा परमेश्वरि ! ।
आदौ लिङ्गं प्रपूज्याथ विल्वपत्रैर्व्वरानने ! ॥
पश्चादन्यं महेशानि ! लिङ्गं प्रार्थ्य प्रपूजयेत् ।
अन्यथा मूत्रवत् सर्व्वं शिवपूजां विना प्रिये ! ॥"
इति लिङ्गार्च्चनतन्त्रे १ पटलः ॥

उपक्रमोपसंहारादि । यथा । लिङ्गानि तु उपक्रमोपसंहारावभ्यासापूर्व्वताफलार्थवादोपपत्त्याख्यानि । तदुक्तम् ।
"उपक्रमोपसंहारावभ्यासोऽपूर्व्वताफलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्य्यनिर्णये ॥"
तत्र प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यन्तयोरुपादानं उपक्रमोपसंहारौ । यथा छान्दोग्ये षष्ठे प्रपाठके । प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुन एकमेवाद्वितीयमित्यादौ ऐतदात्म्यमिदं सर्व्वमित्यन्तेन च प्रतिपादनम् ॥ १ ॥ प्रकरणप्रतिपाद्यस्य वस्तुनः तन्मध्ये पौनःपुन्येन प्रतिपादनं अभ्यासः । यथा तत्रैवाद्वितीयवस्तुनो मध्ये तत्त्वमसीति नवकृत्वः प्रतिपादनम् ॥ २ ॥ प्रकरणप्रतिपाद्यस्य वस्तुनः प्रमाणान्तरेणाविषयीकरणं अपूर्व्वत्वम् । यथा । तत्रैवाद्वितीयवस्तुनो मानान्तराविषयीकरणम् ॥३॥ फलन्तु । प्रकरणप्रतिपाद्यस्यात्मज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनम् । यथा । तत्रैव आचार्य्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये इत्यद्वितीयवस्तुज्ञानस्य तत्प्राप्तिप्रयोजनं श्रूयते ॥ ४ ॥ प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनं अर्थवादः । यथा तत्रैव उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्यद्वितीयवस्तुप्रशंसनम् ॥ ५ ॥ प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिः उपपत्तिः । यथा तत्र यथा सौम्यैकेन मृत्पिण्डेन सर्व्वं मृण्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् । इत्यादावद्वितीयवस्तुसाधने विकारस्य वाचारम्भणमात्रत्वे युक्तिः श्रूयते ॥६॥ इति श्रीपरमहंससदानन्दयोगीन्द्रविरचितवेदान्तसारः ॥ (पुराणविशेषः । यथा, देवीभागवते । १ । ३ । १० ।
"एकादशसहस्राणि लिङ्गाख्यं चातिविस्तृतम् ॥"
अस्यान्यद्विवरणं पुराणशब्दे द्रष्टव्यम् ॥ हेतुः । यथा, तर्ककौमुद्याम् । "लिङ्गज्ञानजन्यं लिङ्गिज्ञानमनुमितिः ॥ "ज्ञायमानं लिङ्गन्तु करणं न हि ।" इति भाषापरिच्छेदः ॥ सूक्ष्मशरीरम् । यथा, पञ्चदश्याम् । १ । २३ ।
"बुद्धिकर्म्मेन्द्रियप्राणपञ्चकैर्म्मनसा धिया ।
शरीरं सप्तदशभिः सूक्ष्मं तल्लिङ्गमुच्यते ॥")

लिङ्गकः, पुं, (लिङ्गेन कायतीति । कै+कः ।) कपित्थवृक्षः । इति शब्दचन्द्रिका ॥ (गुणादयोऽस्य कपित्थशब्दे विज्ञेयाः ॥)

लिङ्गवर्द्धः, पुं, (लिङ्गं वर्द्धयतीति । वृध्+णिच्+अच् ।) कपित्थवृक्षः । इति शब्दचन्द्रिका ॥ शिश्नवृद्धिकरणम् । तस्यौषधं यथा,—
"कटुतैलं भल्लातकं वृहतीफलदाड़िमम् ।
वल्कलैः साधितं लिप्तं लिङ्गं तेन विवर्द्धते ॥"
अपि च ।
"कुष्ठमाषमरीचानि तगरं मधुपिप्पली ।
अपामार्गाश्वगन्धा च वृहती सितसर्षपाः ॥
यवाश्चैलं सैन्धवञ्च पाणिकोद्वर्त्तनं शुभम् ।
लिङ्गबाहुस्तनानाञ्च कर्णयोर्व्वृद्धिकृद्भवेत् ॥"
इति गारुड़े १८० अध्यायः ॥

लिङ्गवर्द्धिनी, स्त्री, (लिङ्गं वर्द्धयति या । वृध्+णिच्+इनि । ङीप् ।) अपामार्गः । इति शब्दचन्द्रिका ॥

लिङ्गवृत्तिः, पुं, (लिङ्गमेव वृत्तिर्जीवनोपायो यस्य ।) जीविकार्थंजटादिचिह्नधारी । तत्पर्य्यायः । धर्म्मध्वजी २ । इत्यमरः । २ । ७ । ५४ ॥
"जीविकादिनिमित्तन्तु यो बिभर्त्ति जटादिकम् ।
धर्म्मध्वजी लिङ्गवृत्तिरयं तत्र निगद्यते ॥"
इति शब्दरत्नावली ॥

लिङ्गालिका, स्त्री, क्षुद्रमूषिकः । तत्पर्य्यायः । दीना २ । इति हारावली । २१७ ॥

लिङ्गिनी, स्त्री, (लिङ्गमस्त्यस्या इति । लिङ्ग+इनिः ।) लताविशेषः । पञ्चगुरिया इति हिन्दी भाषा । तत्पर्य्यायः । बहुपत्री २ ईश्वरी ३ शिववल्लिका ४ स्वयम्भूः ५ लिङ्गसम्भूता ६ लैङ्गी ७ चित्रफला ८ चाण्डाली ९ लिङ्गजा १० देवी ११ चण्डा १२ आपस्तम्भिनी १३ शिवजा १४ शिववल्ली १५ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । दुर्गन्धत्वम् । रसायनत्वम् । सर्व्वसिद्धिकरत्वम् । दिव्यत्वम् । वश्यत्वम् । रसनियामकत्वञ्च । इति राजनिर्घण्टः ॥ (सन्न्यासादिलिङ्गधारिणी । यथा, सुश्रुते । ४ । २४ ।
"लिङ्गिनीं गुरुपत्नीञ्च सगोत्रामथ पर्व्वसु ।
वृद्धाञ्च सन्ध्ययोश्चापि गच्छतो जीवितक्षयः ॥")

लिङ्गी [न्], पुं, (लिङ्गमस्त्यस्येति । इनिः ।) हस्ती । इति जटाधरः ॥ त्रि, धर्म्मध्वजी । यथा,—
"अलिङ्गी लिङ्गवेशेन यो लिङ्गमुपजीवति ।
स लिङ्गिनां हरेदेनस्तिर्य्यग्योनौ च गच्छति ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥
(वासनाश्रयः । इति श्रीधरस्वामी ॥ यथा, भागवते । ४ । २९ । ६५ ।
"तेनास्य तादृशं राजन् लिङ्गिनो देहसम्भवम् ।
श्रद्धत्स्वाननुभूतोऽर्थो न मनः स्प्रष्टुमिच्छति ॥")

लिप, श ओ श प ञ लेपे । इति कविकल्पद्रुमः ॥ (तुदा०-उभ०-सक०-अनिट् ।) श, लिम्पोऽस्ति । ओ, लेप्ता । श प ञ, लिम्पति लिम्पते चन्दनेन गात्रं सुखी । इति दुर्गादासः ॥

लिपः, पुं, (लिम्पतीति । लिप+कः ।) लेपनकर्त्ता । इति लिपधातोः कर्त्तरि कप्रत्ययेन निष्पन्नम् ॥

लिपिः, स्त्री, (लिप+"इगुपधात् कित् ।" उणा० ४ । ११९ । इति इन् । सच कित् ।) लिखितवर्णम् । तत्पर्य्यायः ।लिखितम् २ अक्षरसंस्थानम् ३ लिविः ४ ।इत्यमरः ॥ लिखनम् ५ लेखनम् ६ अक्षरविन्यासः ७ लिपी ८ लिवी ९ । इति तट्टीका ॥ अक्षररचना १० । इति जटाधरः ॥ लिपिका ११ । इति शब्दरत्नावली ॥ (यथा, नैषधे । १ । १५ ।
"अयं दरिद्रो भवितेति वैधसीं
लिपिं ललाटेऽर्थिजनस्य जाग्रतीम् ।
मृषा न चक्रेऽल्पितकल्पपादपः
प्रणीय दारिद्र्यदरिद्रतां नृपः ॥"
अस्याः पञ्चविधत्वं यथा, वाराहीतन्त्रे ।
"मुद्रालिपिः शिल्पलिपिर्लिपिर्लेखनिसम्भवा ।
गुण्डिकाघुणसम्भूता लिपयः पञ्चधा स्मृताः ॥")
लिखितपुस्तकादि । इति केचिदिति भरतः ॥

लिपिकरः, पुं, (लिपिं करोतीति । लिपि+कृ+"दिवाविभानिशेति ।" ३ । २ । २१ । इति टः ।) लेखकः । इत्यमरटीका ॥